
# 4 धरा गूर्जरी




जय जय जय मे धरागूर्जरि
गौरवशालिनी त्वं मात: गूर्जरि

पूर्वदिशायां रक्षति कालिका
वसति कृष्ण: पश्चिमदिशायाम्।
उत्तरदिशायां रक्षति अम्बा
कुन्तेश्वरस्य तु दक्षिणधाम॥
धन्या देवरक्षिता गूर्जरि
जय जय जय मे धरागूर्जरि॥

पुण्यसलिला नर्मदामाता
सूर्यतनया वहति विपुला।
साभ्रमत्या इतिहासो विशाल:
गूर्जरदेशस्य महाप्रभाव:॥
धन्या धर्मदायिनी गूर्जरि
जय जय जय मे धरागूर्जरि॥

– नरेन



Get More Learning Materials Here : CLICK HERE www.studentbro.in

## Glossary

**पूर्वदिशायाम्** – in the East **पश्चिमदिशायाम्** – in the West **उत्तरदिशायाम्** – in the North **सूर्यतनया** – daughter of the Sun, the Tapi **साभ्रमत्याः** – of the Sabarmati

## Exercise

**1. Re-write the following words in good hand-writing and read them :**

देवरक्षिता गूर्जरि, पुण्यसलिला नर्मदामाता, धर्मदायिनी गूर्जरी, साभ्रमत्याः इतिहासः।

**2. Answer the following questions on the basis of the poem :**

(1) कालिका कस्यां दिशायां गूर्जरभूमिं रक्षति ?

(2) अम्बा कस्यां दिशायां गूर्जरभूमिं रक्षति ?

(3) का पुण्यसलिला अस्ति ?

(4) कस्याः इतिहासः विशालः ?

**3. Complete the following paragraph using the proper word. Take the base of your seat in the class-room :**

मम पूर्वदिशायां ________ उपविशति। पश्चिमदिशायां ________ उपविशति। ________ दक्षिणदिशायां उपविशति। ________ ________ उपविशति।

**4. Fill in the gaps in the following statements. Follow the illustration :**

**Illustration :** ________ इतिहासः विशालः। (साभ्रमती, ब्रह्मपुत्रा)

साभ्रमत्याः इतिहासः विशालः।

ब्रह्मपुत्रायाः इतिहासः विशालः।

(1) ________ धारा विशाला। (गङ्गा)

(2) ________ प्रभावः विशालः। (यमुना)

(3) ________ करुणा विशाला। (सरस्वती)

(4) ________ तटे राजकोटनगरम् अस्ति । (आजी)

(5) ________ तटे माण्डवीनगरम् अस्ति। (रुक्मावती)

(6) ________ तटे उज्जयिनी अस्ति। (क्षिप्रा)

(7) ________ तटे द्वारकानगरम् अस्ति। (गोमती)

### Activity

- Sing this song in chorus.
- Collect the songs related to Gujarat and sing them.
- Find the places mentioned in this poem from the map of Gujarat. If any song/ riddle/ is available, find it and write it.



Get More Learning Materials Here : CLICK HERE www.studentbro.in